# shrI ketu aShTottarashatanAma stotraM

# શ્રીકેતુ અષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : ketu aShTottarashatanAma stotraM

File name : ketu108nAmastotra.itx

Category : aShTottarashatanAma, navagraha, stotra

Location : doc_z_misc_navagraha

Transliterated by : Manda Krishna Srikanth mandaksk at gmail.com

Proofread by : KSR Ramachandran ramachandran_ksr at yahoo.ca

Latest update : November 19, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીકેતુ અષ્ટોત્તરશતનામસ્તોત્રમ્

કેતુ બીજ મન્ત્ર - ૐ સ્રાઁ સ્રીં સ્રૌં સઃ કેતવે નમઃ ॥

શ‍ૃણુ નામાનિ જપ્યાનિ કેતો રથ મહામતે ।
કેતુઃ સ્થૂલશિરાશ્ચૈવ શિરોમાત્રો ધ્વજાકૃતિઃ ॥ ૧॥

નવગ્રહયુતઃ સિંહિકાસુરીગર્ભસમ્ભવઃ ।
મહાભીતિકરશ્ચિત્રવર્ણો વૈ પિંગળાક્ષકઃ ॥ ૨॥

સ ફલોધૂમ્રસંકાષઃ તીક્ષ્ણદંષ્ટ્રો મહોરગઃ ।
રક્તનેત્રશ્ચિત્રકારી તીવ્રકોપો મહાસુરઃ ॥ ૩॥

ક્રૂરકણ્ઠઃ ક્રોધનિધિશ્છાયાગ્રહવિશેષકઃ ।
અન્ત્યગ્રહો મહાશીર્ષો સૂર્યારિઃ પુષ્પવદ્ગ્રહી ॥ ૪॥

વરહસ્તો ગદાપાણિશ્ચિત્રવસ્ત્રધરસ્તથા ।
ચિત્રધ્વજપતાકશ્ચ ઘોરશ્ચિત્રરથશિખી ॥ ૫॥

કુળુત્થભક્ષકશ્ચૈવ વૈડૂર્યાભરણ સ્તથા ।
ઉત્પાતજનકઃ શુક્રમિત્રં મન્દસખસ્તથા ॥ ૬॥

ગદાધરઃ નાકપતિઃ અન્તર્વેદીશ્વરસ્તથા ।
જૈમિનીગોત્રજશ્ચિત્રગુમાત્મા દક્ષિણામુખઃ ॥ ૭॥

મુકુન્દવરપાત્રં ચ મહાસુરકુલોદ્ભવઃ ।
ધનવર્ણો લમ્બદેહો મૃત્યુપુત્રસ્તથૈવ ચ ॥ ૮॥

ઉત્પાતરૂપધારી ચાઽદૃશ્યઃ કાલાગ્નિસન્નિભઃ ।
નૃપીડો ગ્રહકારી ચ સર્વોપદ્રવકારકઃ ॥ ૯॥

ચિત્રપ્રસૂતો હ્યનલઃ સર્વવ્યાધિવિનાશકઃ ।
અપસવ્યપ્રચારી ચ નવમે પાપદાયકઃ ॥ ૧૦॥

પઞ્ચમે શોકદશ્ચોપરાગખેચર એવ ચ ।

અતિપુરુષકર્મા ચ તુરીયે સુખપ્રદઃ ॥ ૧૧॥

તૃતીયે વૈરદઃ પાપગ્રહશ્ચ સ્ફોટકકારકઃ ।
પ્રાણનાથઃ પઞ્ચમે તુ શ્રમકારક એવ ચ ॥ ૧૨॥

દ્વિતીયેઽસ્ફુટવાગ્દાતા વિષાકુલિતવક્ત્રકઃ ।
કામરૂપી સિંહદન્તઃ સત્યેઽપ્યનૃતવાનપિ ॥ ૧૩॥

ચતુર્થે માતૃનાશશ્ચ નવમે પિતૃનાશકઃ ।
અન્ત્યે વૈરપ્રદશ્ચૈવ સુતાનન્દનબન્ધકઃ ॥ ૧૪॥

સર્પાક્ષિજાતોઽનંગશ્ચ કર્મરાશ્યુદ્ભવસ્તથા ।
ઉપાન્તે કીર્તિદશ્ચૈવ સપ્તમે કલહપ્રદઃ ॥ ૧૫॥

અષ્ટમે વ્યાધિકર્તા ચ ધને બહુસુખપ્રદઃ ।
જનને રોગદશ્ચોર્ધ્વમૂર્ધજો ગ્રહનાયકઃ ॥ ૧૬॥

પાપદૃષ્ટિઃ ખેચરશ્ચ શામ્ભવોઽશેષપૂજિતઃ ।
શાશ્વતશ્ચ નટશ્ચૈવ શુભાઽશુભફલપ્રદઃ ॥ ૧૭॥

ધૂમ્રશ્ચૈવ સુધાપાયી હ્યજિતો ભક્તવત્સલઃ ।
સિંહાસનઃ કેતુમૂર્તી રવીન્દુદ્યુતિનાશકઃ ॥ ૧૮॥

અમરઃ પીડકોઽમર્ત્યો વિષ્ણુદૃષ્ટોઽસુરેશ્વરઃ ।
ભક્તરક્ષોઽથ વૈચિત્ર્યકપટસ્યન્દનસ્તથા ॥ ૧૯॥

વિચિત્રફલદાયી ચ ભક્તાભીષ્ટફલપ્રદઃ ।
એતત્કેતુગ્રહસ્યોક્તં નામ્નામષ્ટોત્તરં શતમ્ ॥ ૨૦॥

યો ભક્ત્યેદં જપેત્કેતુર્નામ્નામષ્ટોત્તરં શતમ્ ।
સ તુ કેતોઃ પ્રસાદેન સર્વાભીષ્ટં સમાપ્નુયાત્ ॥ ૨૧॥

॥ ઇતિ કેતુ અષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Provided by Manda Krishna shrikanth mandaksk at gmail.com
Proofread by KSR Ramachandran ramachandran_ksr at yahoo.ca

*shrI ketu aShTottarashatanAma stotraM*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*